ISSN 976-8645

# अनिर्वचनीयख्यातिवादः

जानकीशरणः

***कूटशब्दाः*** *ख्यातिवादः, अद्वैतवेदान्तः, अध्यासः, असत्ख्यातिः, आत्मख्यातिः, अन्यथाख्यातिः, अख्यातिः, सत्तात्रैविध्यम्।*

***प्रत्यक्षाभासात्मकविपर्ययाख्यभ्रमज्ञानविषये प्रतिदर्शनं विप्रतिपत्तयो दृश्यन्ते। शुक्तौ प्रतीतं रजतं देशान्तरे सदेवेति वैशेषिकाः। शुक्तौ प्रतीतं रजतं ज्ञानस्वरूपमेवेति विज्ञानवादी बौद्धाः। शुक्तावेव तात्कालिकमुत्पन्नं रजतमिति भास्कराचार्यः। न सत् न असत् अनिर्वचनीयमेव रजतमिति अद्वैतवेदान्तिनः। ईदृशविचार एव ख्यातिवाद इत्युच्यते। ख्यातिशब्दः ज्ञानार्थकः। ख्यातिवादविषयस्सुविस्तृतो विचारः तात्पर्यटीकाभाष्यरत्नप्रभा-ख्यातिवाद-प्रमेयरत्नालङ्कारप्रमेयकमलमार्तण्डादिषु ग्रन्थेषु वर्णितमस्ति। तेभ्यः केवलसिद्धान्तमात्रप्रदर्शनमत्र कृत्वा अद्वैतवेदान्तमतानुसारेण अनिर्वचनीयख्यातिवादस्य निरूपणमत्र क्रियते।[1]***

अनादाविह संसारे सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखं च अनुभवन्ति सर्वे प्राणिनः। न अभिलषन्ति दुःखानुभवम्, तथापि अनभीप्सितस्य दुःखस्य कारणं भवति नानाजन्मार्जितवृजिनव्यूह एव। आगमैर्निषिद्धकर्मानुष्ठानेन वृजिनं जायते। तत्र आगमनिषिद्धानुष्ठानस्य कारणे भवतः रागद्वेषौ। रागद्वेषोश्च हेतुः मिथ्याज्ञानम्। तदेव मिथ्याज्ञानम् अध्यासस्य कारँ भवति। तर्हि किं नाम अध्यास इति जिज्ञासामुच्यते–'अतस्मिन् तद्बुद्धिः'[2] इति। अद्वैतवेदान्तस्य केन्द्रीयभूतः सिद्धान्तोऽस्ति अध्यासवादः। भाष्यकारैः भगवच्छङ्कराचार्यैः 'विषयिणि चिदात्मके विषयस्य तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तं तथापि अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य इतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य, अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः'[3] इत्यनेन आत्मानात्मनोरध्यासो भवतीतिसंसूचितम्। तत्रैव भगवत्पादैः अध्यासलक्षणमपि निगदितम्' अध्यासो नाम स्मृतिरूपः परत्र पूर्वदृष्टावभासः'[4] इति। अनादिरनन्तः नैसर्गिकः मिथ्याज्ञानरूपश्च अध्यासः सर्वेषामनर्थानां मूलमस्ति। अस्य प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये च सर्वे वेदान्ता आरभ्यन्ते।

एवञ्च अध्यासं व्यचक्षाणैः श्रीशङ्करभगवत्पादैः पञ्चख्यातिवादाः उपक्षिप्ताः। एभिः पञ्चभिः ख्यातिवादै अध्यासलक्षणस्वरूपस्य व्याख्यानमभिहितमस्ति। प्रसिद्धाचेयं कारिका–

ISSN 976-8645

**आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा।**
**तथाऽनिर्वचनीयख्यातिरेतत्तु ख्यातिपञ्चकम्।।**
**योगाचारो माध्यामिकस्तथा मीमांसकोऽपि च।**
**नैयायिकोऽद्वैतिनश्च ख्यातीरेताः क्रमाज्जगुः।।**[5] **इति।**

एते ख्यातिवादाः रेखाचित्ररूपेण एवं प्रस्तूयन्ते–

**दर्शनभेदेन ख्यातिवादाः**




एतत् ख्यातिवादातिरिक्तः सत्ख्यातिवादः रामानुजदर्शने सदसत्ख्यातिवादः सांख्यदर्शने च स्वीक्रियेते। रामानुजाचार्यस्य विशिष्टाद्वैतसिद्धान्ते इदं रजतमिति ज्ञानं न भ्रमः, यथार्थम् एव, किन्तु विषयव्यवहारबाधात् भ्रमत्वम्। उक्तं च ''याथार्थं सर्वविज्ञानमिति वेदविदां मतम्''[6] इति। सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वम्, विषयव्वहारस्य बाधात् भ्रमत्वम्। तदुपपादनं तु एवम्–यथा पञ्चीकरणप्रक्रियया पञ्चभूतानि संयक्तानि, सम्मिश्रितानि भवन्ति। तथा शुक्तावपि रजतांसो वर्तते, स एव रजतांशः सत्यः तज्ज्ञाने भासते। विद्यमानमेव रजतं विषयो भवति। परन्तु रजतांशस्या अल्पत्वात् न व्यवहारः। व्यवहारबाधात् तस्य ज्ञानस्य भ्रमत्वम् इति तेषामाशयः।

ISSN 976-8645

साङ्ख्यैर्हि सदसत्ख्यातिमाध्यमेन भ्रमस्य व्याख्या समारब्धा। तत्र इदं रजतम् इत्यत्र इदमिति प्रमाज्ञानमस्ति, यतो हीदम् सत्यशुक्तिविषयकं भवति। रजतमुपस्थितं नास्ति। अतस्तदसद्वस्तविषयकं वर्तते। प्रमाज्ञाने सति रजतात्मकं वस्तु बाधितं भवति, तथा सदिदं शुक्तिरूपेण व्यवस्थितं तिष्ठति।[7] सदसत्ख्यातिसिद्धान्ते सतः ख्यातिः अङ्गीक्रियते, अत इत्थमपि भ्रमस्य व्याख्यानं दुष्करमेव, यतः सतश्चेज्ज्ञानं भवेत् तर्हि गगनकुसुमस्यापि कदापि प्रतीतिः जायेत। असतः ख्यातिमद्वैतिभिः नाङ्गीक्रियते।

अत्र किञ्चित् सङ्क्षेपेण एतेषां ख्यातिवादानां परिचयः प्रस्तूयते।

1. **असत्ख्यातिवादः**–माध्यमिकबौद्धमतानुसारेण शून्यमेव परं तत्त्वमस्ति। तैः ज्ञान–ज्ञेय–ज्ञातृभावमयसम्पूर्णविश्वाय 'सर्वं शून्यम्' इति सिद्धान्तस्य प्रतिपादनं विधीयते। मतेऽस्मिन् शुक्तिरूप्यादिभ्रमस्थ्लीयविषयाणां व्याख्या शून्यरूपेणैव दातुं युज्यते। शून्यवादिमतेन यथा बाह्यमस्ति अत्यन्तालीकम्, तद्वद् अन्तरिविज्ञानमपि असदेवास्ति। अत्र न्यायमकरनदकारः "अन्ये तु अत्यन्तमसन्तमर्थमवभासयती संविदेव विभ्रम इत्याचक्षते"[8] इति। न्यायकोशकारः "वाचस्पतिमिश्रा अपि शुक्ताविदं रजतमिति ज्ञाने प्रसिद्धयोः शुक्तिरजतत्वयोरलीक एव समवायो भासत इत्यासत्ख्यातिमङ्गीचक्रुः"[9] इति। यदि च सर्वमसद् वर्तते तदा विश्वप्रपंचोपलब्धेर्व्याख्या का भवेत्? शून्यवादिनामत्रेदमुत्तरं यत्प्रपंचस्य सांवृतिकप्रतीतौ कापि बाधा नास्ति। संवृतेरर्थः अविद्यास्ति। अविद्यावशेन प्रपंचप्रतीतिव्याख्या सांवृतिकरूपेणोपस्थाप्यते। सर्वं शून्यं शून्यमितिवदता ते भ्रमाधिष्ठानः शुक्तिः असदस्ति तथा आरोपितविषयो रजतमपि असदेवेति तेषां सिद्धान्तः। अतः शुक्तिरजतव्यवहारेऽत्यन्तासद्रजतमेव प्रतीयते। अयमेव शून्यवादिनामसत्ख्यातिवादः। किन्तु पक्षोऽयं चित्सुखाचार्याः एवं निराकुर्वन्ति–"विज्ञानमेवासत्प्रकाश इत्यसत्ख्यातिवादिनाम–सत्प्रलाप इत्यारोप्यमाणं नासत्" इति।
2. **आत्मख्यातिवादः**–मतमिदं विज्ञानवादिबौद्धानाम्। ते बहिर्वस्तूनां स्वतन्त्रसतां नाङ्गीकुर्वन्ति। क्षणिकविज्ञानमेव तत्त्वम्। एतन्मतानुसारेण विज्ञानातिरिक्ताः सर्वे घटपटादिबाह्यपदार्थाः न स्वीक्रियन्ते। तेच शशशृङ्ग–आकाशकुसुमवदसत्। घटपटादिविषयाः अपि विज्ञानरूपाः सन्ति। भ्रमे भासमानं रजतमपि विज्ञारूपमस्ति, तदाकारो भवति। "ज्ञानमुखादिकं तु तस्यैवाकारविशेष इति, विज्ञानमेवात्मा, तस्य स्वतः प्रकाशरूपत्वात् चेतनत्वम्"[10] इति। एवमान्तररजतविज्ञानमेव बहिर्वदवभासते। वस्तुतो बाह्यसत्ता भ्रममात्रमस्ति। अर्थात् विज्ञानव्यतिरिक्तं नास्ति किमपि वस्त्विति तेषां राद्धान्तः।

ISSN 976-8645

सर्वं विज्ञानमेव तत्र–''तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्। तत्स्यादालयविज्ञानं यन्नीलादिकमुल्लिखेत्[11] इति। विज्ञानरूपेण रजतं सदस्ति, किं तु इदंरूपेणासदस्ति। अत इदं रजतमित्यत्ररजतस्येदंरूपेण ज्ञानमेव भ्रमोऽस्ति।

शुक्तिं दृष्ट्वा ''इदं रजतं'' इति यज्ज्ञानं भवति तत्र अख्यातिवादिन: एवमुपपत्तिं प्रदर्शयन्ति– शुक्ति: विज्ञानस्यैवाकारविशेषो भवति,तथा रजतञ्च, तद्रजतं नेत्रेन्द्रियं प्रकाशयति। शुक्तौ भासमानं रजतमसन्न, अनिर्वचनीयं वा न भवति। यदा नेदं रजतं इति ज्ञानेन रजतस्य बाध: तदा बाधकज्ञानं रजतं न बाधते, किन्तु पुरोवर्तित्वरूपधर्मं बाधते। अतो विज्ञानाकारतया रजतम् अस्त्येव, अत एव आत्मन: विज्ञानस्य ख्याति: प्रतीतिस्तु घटते। चित्सुखाचार्यै: आत्मख्यातिम् एवं निरूपितम्–''नेदं रजतमिति बाधस्येदन्तामात्रस्य गोचरत्वात्, द्वयोर्बाधककल्पनायां कल्पनागौरवात् नेदं रजतमिति च रजते बाधादर्शनात्''[12] इति।

3. **अख्यातिवाद**:–प्राभाकरानुसारेणाख्यातिवादिमते भ्रमज्ञानमेव न भवति। यद्यपि प्रभाकरं विना अन्ये पूर्वमीमांसका: यथार्थोऽयथार्थश्चेति द्विविधोऽनुभव इति स्वीकुर्वन्ति। किन्तु प्रभाकरमते अयथार्थानुभवो नास्ति। 'तत्रायथार्थज्ञानस्याभावात् तत्त्वपदमनर्थकमिति प्राभाकरा: प्राहु:''[13] इति। एतदनुसारेण 'नेदं रजतम्' इति निषेधेन केवलं व्यवहारस्य बाधो जायते। ज्ञानं सदा अबाधितं तिष्ठति। 'इदं रजतम्' इत्यत्र इदमिति ज्ञानं प्रत्यक्षात्मकमस्ति, रजतमिति तु स्मरणात्मकं ज्ञानमिति द्वे ज्ञाने वर्तेते। उभेऽपि यथार्थे। शुक्तिरजतस्थलेइदं रजतमिति ज्ञाने चक्षु: सन्निकृष्टं वस्तु इदन्त्वेन गृह्यते। रजतं नेन्द्रियसम्बद्धं भवति, अत: न ख्याति: अख्याति: अर्थात् रजतस्य ख्यातिर्नास्ति, रजतं न भासते। अतो ''इदं रजतं'' मिति ज्ञाम् इदमंशे प्रत्यक्षं, रजतांशे तु स्मरणम्। प्रत्यक्षस्मरणयो: भेदाग्रहणेन भ्रम: प्रतीयते। अतो भ्रमस्थतेष्वपि मिथ्याज्ञानानि नन्ति। अत एव सर्वाणि ज्ञानानि यथार्थानि। उक्तञ्च ''इदं रजतम् इत्यत्र इदमिति अगृहीतविशेषं शुकुशकतं गृह्यते, रजतम्–इति च रजतमात्र स्मर्यते। तयोश्च भेदाग्रहात् पुरोवर्तिनि रजतार्थिन: प्रवृत्ति:, न शुक्तिशकलस्य रजतत्वेन भानमस्तीति''[14]। तत्र चित्सुखाचार्या: प्रभाकरमतं निराकरणाय अख्यातिवादं विशदयति ''ननु तथाप्यसंभविलक्षणंसर्वप्रत्यानां यथार्थत्वेन विभ्रमानामेवाभावात्'' इत्यादि। तत्पक्षेऽनुमानमपि प्रमाणं 'विगीता: प्रत्यया: यथार्था:, प्रत्ययत्वात्, सम्प्रतिपन्नवदिति।' अन्यथान्याकारस्य प्रत्ययस्यान्यालम्बनतायामनुभवविरोधात्, संविदां स्वविषयव्यभिचारे चानाश्वासप्रसङ्गादित्यादि।[15]

ISSN 976-8645

4. **अन्यथाख्यातिवादः**-न्यायनये अन्यथाख्यातिवादः स्वीक्रियते। यद्वस्तु येन रूपेण धर्मेण वा वर्तेते तेनैव रूपेण धर्मेण वा भासते चेत्तदा यथार्थज्ञानं भवति। यथा यदि वह्निः वह्नित्वेन, द्रव्यत्वेन, तेजस्वेन, धूमजनकत्वेन वा भासते चेत्तज्ज्ञानं प्रमा इति। पृथिवीत्वेन, गुणत्वेन, मनस्वेन, आत्मत्वेनवा वह्निः भासते चेत्तज्ज्ञानम् अप्रमा इति व्यवहारः। मतेऽस्मिन् भ्रमस्थले देशान्तरीवस्तु इदन्त्वरूपेण प्रत्यक्षं भवति। यस्य पुरुषस्य यस्य वस्तुनः अनुभवजन्यसंस्काराः भवन्ति, तस्य सत्यस्य वस्तुनः संस्कारसादृश्यहेतुना 'इयम्' वस्तुनो भ्रमो जायते। 'शक्तिरजतम्' इत्यत्र न्यायानुसारेण रजतज्ञानमेकं विशिष्टज्ञानमस्ति। अस्मिन्विशिष्टज्ञाने, इदमर्थः विशेष्यं तथा रजतमिति विशेषणमस्ति। इदमेव विशिष्टज्ञानं न्यानये भ्रमज्ञानमस्ति। इत्थं च न्यायनये भ्रमेन देशान्तरीयरजतमपि सत्यमस्ति, समक्षे च इदमपि सत्यमेव। तत्र च तयोस्तादात्म्यसम्बन्ध एव समारोपितो भाति। एवं भ्रमत्वोपपादनाय अन्यथाख्यातिमाश्रयन्ति नैयायिकाः ''तच्छून्ये तन्मतिर्या स्यादप्रमासा निरूपिता। तदभाववति तत्रकारकं ज्ञानं भ्रम''[16] इति।

5. **अनिर्वचनीयख्यातिवादः**-भ्रमस्य अथवा अध्यासस्य व्याख्यानम् अनिर्वचनीयख्यात्योपयन्ति अद्वैतवेदान्तिनः। तदुनुसारेण भ्रमस्थलीयज्ञानतद्विषयौ अनिर्वचनीयौ भवतः। भ्रमस्थलीयानिर्वचनीयावस्तूत्पत्तिमन्तरा भ्रमस्य व्याख्यां कर्तुमशक्यम्, यतो हि भ्रमस्थलीयवस्तु अलीकमस्ति तदा तस्य प्रतीतिर्न भवेत्, तत् सद् अर्थात् यदि व्यावहारिकं सत् तर्हि भ्रम एव न सिद्ध्येत्, तथा व्यवहारे भ्रमे च यो भेदः तस्य व्याख्यानं दुष्करमेव।

वस्तुनः आत्मख्यात्या बाह्यवस्तुव्याख्या न स्यात्। अतो भ्रमकालिकवस्तूनि, नान्तर्मात्रवस्तूनि। स्मृतिरनुभवश्चेति ज्ञानद्वयमाश्रित्य भ्रमस्य व्याख्यानं दुष्करमेव। देशान्तरीयवस्तुनश्च पुरोवर्तिनि संभवो नास्ति। अतो भ्रमस्थलीयवस्तु अनिर्वचनीयमेवेत्येव स्वीकरणीयम। अनिर्वचनीयश्च प्रतीतिकालकतया सन्। शुक्तिरजतसत्ता तावदेवास्ति यावच्च शुक्तिविषयकमज्ञानमिति। शुक्तिविषयकज्ञाने सति तद्विषयकज्ञानं विलीयते। तेन च अज्ञानोपादानकं रजतमपि विलीयते। अयमैव बाध इत्युच्यते। ज्ञानेन अज्ञानं तत्कार्यञ्च बाध्यते। सद्रूपेणासद्रूपेणच यन्निर्वाच्यं न भवति तदनिर्वचनीयम्। सदस्ति ब्रह्म। शुक्तिरजतस्य शुक्तिज्ञाने बाधो जायते। तत एव तत्सद्भिलक्षणमस्ति। गगनकुसुमस्यालीकस्य कदापि प्रतीतिर्न भवति। शुक्तिरूपस्य अस्ति प्रतीतिः, अतः तदत्यन्त असन् न भवति। सदसतोः एकत्र मेलने व्याघातोऽस्ति। तथा च तत्सदसद्विलक्षणमपि। तेन च अनिर्वचनीयम्। परेऽत्र प्रत्यवतिष्ठन्ते, किमनिर्वचनीयस्यास्ति

ISSN 976-8645

निरुक्तिविरहता ? अथवा निरुक्तिनिमित्तवियुक्तिविरहिताऽस्ति तस्यार्थश्च ? एतत्प्रश्नोत्तररूपेन श्रीचित्सुखाचार्येणानिर्वचनीयस्यैकं युक्तिमण्डितं लक्षणं प्रदत्तम्।

**'प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।**

**गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः।।' इति तत्त्वप्रतीपिकायाम्**[17]**।**

यस्य सत्त्वेन, असत्त्वेन, उभयकोटिभ्यामपि विचारः कर्तुमशक्यः, तदेवानिर्वचनीयमिति। अस्य लक्षणस्य न कुत्रचिदव्याप्तिः, न वा कुत्राप्यतिव्याप्तिः। निरुक्तिविरहतापत्तिर्नास्ति,यतो निरुक्तेर्निमित्तस्यार्थस्य ज्ञानस्य सत्त्वेऽपि सदसत्त्वादिप्रकारैस्तस्य निर्वचनस्यावकाशो न लभ्यते। अतोऽस्त्यनिर्वाच्यम्। अद्वैतसिद्धिकारैः श्रीमधुसूदनसरस्वतीमहाभागेनापि ईदृशमेवानिर्वचनीयलक्षणं प्रस्तुतम्।'ज्ञानबाध्यत्वम्' इत्यप्यनिर्वचनीयलक्षणम्। यतोऽनिर्वचनीयाविद्यातत्कार्यस्य चज्ञानेन बाधो दृश्यते। शुक्तिरजतादिभ्रमस्थलेऽपि शुक्तिरजतमित्येवं मिथ्याऽस्ति यद् रजतभानकालेऽपि तत्र व्यावहारिकजतस्य त्रैकालिकोऽभावो वर्तते। आचार्यचित्सुखेनानिर्वाच्यत्वेऽनुमानमपिपुरस्कृतम्।'विमतं रजतम् अनिर्वचनीयम्, बाध्यत्वात् यन्नानिर्वचनीयम्, तन्न बाध्यम् यथात्मेति। आत्मा च न अनिर्वाच्यम्। न च बाध्यं वेति, शुक्तिरजतमस्ति बाध्यं ततो भवति अनिर्वाच्यम्।

अत्र अनिर्वचनीयख्यातिवादनिरूपणप्रसङ्गावसरे सत्तात्रैविध्यमुपयुज्यते। तद्विना अनिर्वचनीयख्यातिवादस्य व्याख्यानं कर्तुमशक्यम्। सत्त्वं त्रिविधम्-पारमार्थिकसत्त्वम्, व्यावहारिकसत्त्वम्, प्रातिभासिकसत्त्वम् च।

**पारमार्थिकसत्त्वम्**-यस्य सत्त्वं कालत्रयेऽप्यबाधितं भवति, यस्य ज्ञानं कालत्रयेऽपि ज्ञानान्तरेन न बाध्यते, तस्य पारमार्थिकसत्त्वम् यथा ब्राह्मणः।

**व्यावहारिकसत्त्वम्**-यस्य सत्त्वं ज्ञातृकाले न बाध्यते, ज्ञातुः सत्त्वावस्थायां यस्य सत्त्वं ज्ञानान्तरेण न बाध्यते, किं तु ब्रह्मज्ञानेन बाध्यते तस्य व्यावहारिकसत्त्वम्।

**प्रातिभासिकसत्त्वम**-यस्य तु सत्त्वं प्रतीतिसमये एव वर्तते परन्तु ब्रह्मज्ञानातिरिक्तज्ञानान्तरेण लौकिकप्रमाणेन वा बाध्यते, तस्य प्रातिभासिकसत्त्वम्। तदुक्तं पञ्चपादिकाविवरणे 'त्रिविधं सत्त्वम्, परमार्थब्राह्मणः, अर्थक्रियासामर्थ्यं सत्त्वं मायोपाधिकमाकाशादेः, अविद्योपाधिकं सत्त्वं रजतादेः' इति।

इत्थमद्वैतवादिनोऽनिर्वचनीयख्यातिद्वारेण भ्रस्थले अनिर्वचनीयवस्तुस्वीकणेन अध्यासस्य, भ्रमस्य वा व्याख्या विद्धति। अध्यासस्य सुसंगता व्याख्या अनिर्वचनीयख्यात्यैव केवलं भवितुमर्हति। अनेन जगत्सृष्टेर्व्याख्या समीचीना प्रस्तूयते, तोऽद्वैतमतेन अखिलोऽपि प्रपञ्चोऽपि मिथ्या भवति। इति शम्।

ISSN 976-8645

# अन्तटिप्पणी

1. पत्रमिदं जवाहरलालनेहरुविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रेण आयोजिते प्रथमनिखिलसंस्कृतच्छात्रसम्मेलने (सेप्टेम्बर् ३-७, २०१२)
2. ब्रह्मसूत्रशाङ्करभाष्यम्, अध्यासभाष्यम्,पृ. ४४
3. तत्रैव, पृ. ७
4. तत्रैव, पृ. १७
5. न्यायकोशः, २५६
6. श्रीभाष्यम्, पृ. २९
7. सदसत्ख्यातिर्बाधाबाधदर्शनात्, साङ्ख्यप्रवचनभाष्यम्, पृ. ५/५५-५६
8. न्यायमकरन्दः, १०२
9. न्यायकोशः, २५६
10. न्यायसिद्धान्तमुक्तावलिः, १५.९
11. सर्वदर्शनसङ्ग्रहः, १५
12. तत्त्वप्रदीपिका, १२७
13. मानमेयोदयः, ६
14. तत्रैव, ६
15. तत्त्वप्रदीपिका, १०४-१०६
16. न्यायसिद्धान्तमुक्तावलिः, ४७५
17. तत्त्वप्रदीपिका, १३ पृ. ७९

# सन्दर्भग्रन्थसूची

१. श्रीशङ्काराचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम्, निर्णयसागरमुद्रणालयः, मुम्बई, १९३८
२. श्रीरामानुजाचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम्, निर्णयसागरमुद्रणालयः, मद्रासः, १९२४
३. माधवाचार्यः, सर्वदर्शनसङ्ग्रहः, आनन्दाश्रममुद्रणालयः, पूना, १९२२
४. माधवाचार्यः, सर्वदर्शनसङ्ग्रहः, आनन्दाश्रममुद्रणालयः, पूना, १९३७
५. विश्वनाथपञ्चाननः, न्यायसिद्धान्तमुक्तावलिः, चौखम्बासंस्कृतसिरीज्, वारणसी, १९५२

ISSN 976-8645


६. भीमाचार्यः, न्यायकोशः, भण्डार्कर-ओरियण्टल्-रिसर्च-इंस्टिट्यूट्, पूना, १९७८

७. चित्सुखाचार्यः, तत्त्वप्रदीपिका, चौखम्बासंस्कृतसिरीज्, वाराणसी, १९३४

८. पद्मपादाचार्यः, पञ्चपादिका, मद्रासः, १९५८

९. आनन्दबोधभट्टारकः, न्यायमकरन्दः, निर्णयसागरमुद्रणालयः, मुम्बई, १९३७

१०. नारायणभट्टः, मानमेयोदयः षड्दर्शनप्रकाशनप्रतिष्ठानम्,वाराणसी, १९७८

११. चन्द्रधरशर्मा, भारतीयदर्शनम्, मोतीलातबनारसीदास, वाराणसी, २००२

१२. अभेदानन्दभट्टाचार्यः, अद्वैततत्त्वमीमांसा, परिमलपब्लिकेशन्स्, दिल्ली, १९९०

१३. कालीप्रसादसिंहः, शाङ्करवेदान्ततत्त्वमीमांसा, विश्वविद्यालयप्रकाशनम्, वाराणसी, १९८२